# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 8

[[8-0-0]]

स॒ह ना॑ववतु।

स॒ह नौ॑ भुनक्तु।

स॒ह वी॒र्यं᳚ करवावहै।

ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

[[8-1-1]]

ब्र॒ह्म॒विदा᳚प्नोति॒ पर᳚म्।

तदे॒षाऽभ्यु॑क्ता।

स॒त्यं ज्ञा॒नम॑न॒न्तं ब्रह्म॑।

यो वेद॒ निहि॑तं॒ गुहा॒यां प॑र॒मे व्यो॑मन्न्।

सो᳚ऽश्नुते॒ सर्वा॒न्कामा᳚न्थ्स॒ह।

ब्रह्म॑णा विप॒श्चितेति॑।

तस्मा॒द्वा ए॒तस्मा॑दा॒त्मन॑ आका॒शस्संभू॑तः।

आ॒का॒शाद्वा॒युः।

वा॒योर॒ग्निः।

अ॒ग्नेराप॑ः।

अ॒द्भ्यः पृ॑थि॒वी।

पृ॒थि॒व्या ओष॑धयः।

ओष॑धी॒भ्योऽन्न᳚म्।

अन्ना॒त्पुरु॑षः।

स वा ए॒ष पुरु॑षोऽन्न॑रस॒मयः।

तस्येदमेव शिरः।
अयं दक्षिणः पक्षः।
अयमुत्तरः पक्षः।
अयमात्मा।
इदं पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ १॥ ॥ १॥

[[8-2-1]]
अन्नाद्वै प्रजाः प्रजायन्ते।
याः काश्च पृथिवीꣳ श्रिताः।
अथो अन्नेनैव जीवन्ति।
अथैनदपि यन्त्यन्ततः।
अन्नꣳ हि भूतानां ज्येष्ठम्।
तस्मात्सर्वौषधमुच्यते।
सर्वं वै तेऽन्नमाप्नुवन्ति।
येऽन्नं ब्रह्मोपासते।
अन्नꣳ हि भूतानां ज्येष्ठम्।
तस्मात्सर्वौषधमुच्यते।
अन्नाद्भूतानि जायन्ते।
जातान्यन्नेन वर्धन्ते।
अद्यतेऽत्ति च भूतानि।
तस्मादन्नं तदुच्यत इति।
तस्माद्वा एतस्मादन्नरसमयात्।
अन्योऽन्तर आत्मा प्राणमयः।
तेनैष पूर्णः।
स वा एष पुरुषविध एव।
तस्य पुरुषविधताम्।
अन्वयं पुरुषविधः।
तस्य प्राण एव शिरः।
व्यानो दक्षिणः पक्षः।

अपान उत्त॑रः प॒क्षः।
आका॑श आ॒त्मा।
पृथिवी पुच्छं᳚ प्रति॒ष्ठा।
तदप्येष श्लोको᳚ भ॒वति॥ २॥ ॥ २॥

[[8-3-1]]
प्रा॒णं दे॒वा अनुप्राण॑न्ति।
म॒नु॒ष्या᳚ः प॒शव॑श्च॒ ये।
प्रा॒णो हि भू॒ताना॒मायु॑ः।
तस्मा᳚थ्सर्वा॑युषमु॑च्यते।
सर्व᳚मे॒व त॒ आयु॑र्य॑न्ति।
ये प्रा॒णं ब्रह्मो॒पास॑ते।
प्राणो हि भूता॑नामा॒युः।
तस्मा᳚थ्सर्वा॑युषमुच्य॑त इ॒ति।
तस्यैष एव शारी॑र आ॒त्मा।
य॑ः पू॒र्वस्य।
तस्माद्वा एतस्मा᳚त्प्रा॒णमयात्।
अन्योऽन्तर आत्मा॑ मनो॒मयः।
ते॑नै॑ष पू॒र्णः।
स वा एष पुरुषवि॑ध ए॒व।
तस्य पुरु॑षवि॒धताम्।
अन्वयं᳚ पुरु॒षविधः।
तस्य यजु॑रे॒व शिरः।
ऋग्दक्षि॑णः प॒क्षः।
सामोत्त॑रः प॒क्षः।
आदे॑श आ॒त्मा।
अथर्वाङ्गिरसः पुच्छं᳚ प्रति॒ष्ठा।
तदप्येष श्लोको᳚ भ॒वति॥ ३॥ ॥ ३॥

[[8-4-1]]

यतो वाचो निवर्तन्ते।
अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्।
न बिभेति कदाचनेति।
तस्यैष एव शारीर आत्मा।
यः पूर्वस्य।
तस्माद्वा एतस्मान्मनोमयात्।
अन्योऽन्तर आत्मा विज्ञानमयः।
तेनैष पूर्णः।
स वा एष पुरुषविध एव।
तस्य पुरुषविधताम्।
अन्वयं पुरुषविधः।
तस्य श्रद्धैव शिरः।
ऋतं दक्षिणः पक्षः।
सत्यमुत्तरः पक्षः।
योग आत्मा।
महः पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ ४॥ ॥ ४॥

[[8-5-1]]
विज्ञानं यज्ञं तनुते।
कर्माणि तनुतेऽपि च।
विज्ञानं देवास्सर्वे।
ब्रह्म ज्येष्ठमुपासते।
विज्ञानं ब्रह्म चेद्वेद।
तस्माच्चेन्न प्रमाद्यति।
शरीरे पाप्मनो हित्वा।
सर्वान्कामान्थ्समश्नुत इति।
तस्यैष एव शारीर आत्मा।
यः पूर्वस्य।

तस्माद्वा एतस्माद्विज्ञानमयात्।
अन्योऽन्तर आत्माऽऽनन्दमयः।
तेनैष पूर्णः।
स वा एष पुरुषविध एव।
तस्य पुरुषविधताम्।
अन्वयं पुरुषविधः।
तस्य प्रियमेव शिरः।
मोदो दक्षिणः पक्षः।
प्रमोद उत्तरः पक्षः।
आनन्द आत्मा।
ब्रह्म पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ ५॥ ॥ ५॥

[[8-6-1]]
असन्नेव स भवति।
असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद।
सन्तमेनं ततो विदुरिति।
तस्यैष एव शारीर आत्मा।
यः पूर्वस्य।
अथातोऽनुप्रश्नाः।
उताविद्वानमुं लोकं प्रेत्य।
कश्चन गच्छती ३।
आहो विद्वानमुं लोकं प्रेत्य।
कश्चित्समश्नुता ३ उ।
सोऽकामयत।
बहु स्यां प्रजायेयेति।
स तपोऽतप्यत।
स तपस्तप्त्वा।
इदꣳ सर्वमसृजत।

यदिदं किंच।
तथ्सृष्ट्वा।
तदेवानुप्राविशत्।
तदनुप्रविश्य।
सच्च त्यच्चाभवत्।
निरुक्तं चानिरुक्तं च।
निलयनं चानिलयनं च।
विज्ञानं चाविज्ञानं च।
सत्यं चानृतं च सत्यमभवत्।
यदिदं किंच।
तत्सत्यमित्याचक्षते।
तदप्येष श्लोको भवति॥ ६॥ ॥ ६॥

[[8-7-1]]
असद्वा इदमग्र आसीत्।
ततो वै सदजायत।
तदात्मानꣳ स्वयमकुरुत।
तस्मात्तथ्सुकृतमुच्यत इति।
यद्वै तथ्सुकृतम्।
रसो वै सः।
रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति।
को ह्येवान्यात्कः प्राण्यात्।
यदेष आकाश आनन्दो न स्यात्।
एष ह्येवाऽऽनन्दयाति।
यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते।
अथ सोऽभयं गतो भवति।
यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते।
अथ तस्य भयं भवति।
तत्त्वेव भयं विदुषोऽमन्वानस्य।
तदप्येष श्लोको भवति॥ ७॥ ॥ ७॥

[[8-8-1]]
भीषाऽस्माद्वातः पवते।
भीषोदेति सूर्यः।
भीषाऽस्मादग्निश्चेन्द्रश्च।
मृत्युर्धावति पञ्चम इति।
सैषाऽऽनन्दस्य मीमाꣳसा भवति।
युवा स्यात्साधुयुवाऽध्यायकः।
आशिष्ठो दृढिष्ठो बलिष्ठः।
तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्।
स एको मानुष आनन्दः।
ते ये शतं मानुषा आनन्दाः॥
स एको मनुष्यगन्धर्वाणामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं मनुष्यगन्धर्वाणामानन्दाः।
स एको देवगन्धर्वाणामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं देवगन्धर्वाणामानन्दाः।
स एकः पितृणां चिरलोकलोकानामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं पितृणां चिरलोकलोकानामानन्दाः।
स एक आजानजानां देवानामानन्दः॥
श्रोत्रियस्य चाकामहतस्य।
ते ये शतमाजानजानां देवानामानन्दाः।
स एकः कर्मदेवानां देवानामानन्दः।
ये कर्मणा देवानपियन्ति।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं कर्मदेवानां देवानामानन्दाः।
स एको देवानामानन्दः।
श्रोत्रियस्य चाकामहतस्य।

ते ये शतं देवानामानन्दाः।
स एक इन्द्रस्याऽऽनन्दः॥
श्रोत्रियस्य चाकामहतस्य।
ते ये शतमिन्द्रस्याऽऽनन्दाः।
स एको बृहस्पतेरानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं बृहस्पतेरानन्दाः।
स एकः प्रजापतेरानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं प्रजापतेरानन्दाः।
स एको ब्रह्मण आनन्दः।
श्रोत्रियस्य चाकामहतस्य॥
स यश्चायं पुरुषे।
यश्चासावादित्ये।
स एकः।
स य एवंवित्।
अस्माल्लोकात्प्रेत्य।
एतमन्नमयमात्मानमुपसंक्रामति।
एतं प्राणमयमात्मानमुपसंक्रामति।
एतं मनोमयमात्मानमुपसंक्रामति।
एतं विज्ञानमयमात्मानमुपसंक्रामति।
एतमानन्दमयमात्मानमुपसंक्रामति।
तदप्येष श्लोको भवति॥ ८॥ ॥ ८॥

[[8-9-1]]
यतो वाचो निवर्तन्ते।
अप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्।
न बिभेति कुतश्चनेति।
एतꣳ ह वाव न तपति।

किमह२ँ साधु नाकरवम्।
किमहं पापमकरवमिति।
स य एवं विद्वानेते आत्मानग्ँ स्पृणुते।
उभे ह्येवैष एते आत्मानग्ँ स्पृणुते।
य एवं वेद।
इत्युपनिषत्॥ ९॥ ॥ ९॥

ब्रह्मविदिदमयमिदमेकविंशतिरन्नादन्नरसमयात्प्राणो व्यानोऽपान आकाशः पृथिवी पुच्छ२ँ षड्विंशतिः प्राणं यजुर्ऋक्सामादेशोऽथर्वाङ्गिरसः पुच्छं द्वाविंशतिर्यतश्श्रद्धर्त२ँ सत्यं योगो महोऽष्टादश विज्ञानं प्रियं मोदः प्रमोद आनन्दो ब्रह्म पुच्छं द्वाविंशतिरसन्नेवाष्टाविंशतिरसथ्षोडश भीषाऽस्मान्मानुषो मनुष्यगन्धर्वाणां देवगन्धर्वाणा पितृणां चिरलोकलोआनामाजानजानां कर्मदेवानां ये कर्मणा देवानामिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मणस्स यश्च संक्रामत्येकपञ्चाशद्युतः  कुतश्च नैकादश नव॥ ९॥

ब्रह्मविन्नव॥ ९॥

[[8-0-0]]
सह नाववतु।
सह नौ भुनक्तु।
सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः॥